International Journal of Sanskrit Research 2021; 7(4): 52-54

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 52-54
© 2021 IJSR
www.anantaajournal.com
Received: 10-05-2021
Accepted: 21-06-2021

**सोमा-माइति:**
शोधछात्रा, संस्कृतविभाग:, रेवेंशा-विश्वविद्यालय:, कटक्, ओडिशा, भारत

**Corresponding Author:**
**सोमा-माइति:**
शोधछात्रा, संस्कृतविभाग:, रेवेंशा-विश्वविद्यालय:, कटक्, ओडिशा, भारत

# भारतीयसंस्कृतौ उपनयनसंस्कार:

**सोमा-माइति:**

**प्रस्तावना**

सम्-पूर्वकं कृ-धातोरुत्तरे क्तिन्-प्रत्ययात् संस्कृतशब्दो निष्पद्यते। यस्यार्थो भवति सम्यक् कृति:। मानवा: समाजस्य श्रेष्ठजीवा:। समाजस्य कल्याणार्थं तेषामवदानम् अधिकं वर्तते। मानवसम्प्रदायस्य चिन्तानुभूतिज्ञानविश्वासप्रभृतय: संस्कृतेन सह संयुज्यन्ते। समाजभेदे संस्कृतेरपि वैचित्र्यता संलक्ष्यते। विविधानां जनगोष्ठीनां सांस्कृतिकवैशिष्ट्यं सांस्कृतिगाचारानुष्ठानेन प्रकाश्यते। अत: सर्वै: प्रयत्नेन सांस्कृतिकसौन्दर्यस्य संरक्षणं कर्तव्यम्। केवलं संस्कृत्यर्थं मानवा: अन्येभ्यो जीवेभ्य ऐश्वर्यशालिन: भूयन्ते। अस्माकं संस्कृति: संस्कारेण परिपुष्यते। जन्मत: मृत्युं यावत् वहुभि: संस्कारै: जीवनमतिक्रम्यते। मानवजीवने गुणस्य विकासार्थं यत् कर्म क्रियते तत् हि संस्कार:—

''संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा।''[१]

भारतीयसंस्कृति: वैदिकपरम्परानुसारिणी, अत: सर्वाधिका प्रवीणा समृद्धा च। भारतीयसंस्कृत्यां वहुविधा: संस्कारा: वरीवर्तन्ते। तत्र व्याससमृत्यां षोडश संस्कारा: स्वीक्रियन्ते —

''गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
नामक्रियानिष्क्रमणे अन्नाशनं वपनक्रिया:।
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधि:।
केशान्त: स्नानमुद्वाहो विवाहाग्निपरिग्रह:।
त्रैताग्निसंग्रहश्चेति संस्कारा: षोडश स्मृता:।।''[२]

षोडशानां संस्काराणां नामानि निम्नत: प्रदीयन्ते —

१. गर्भाधानसंस्कार:
२. पुंसवनसंस्कार:
३. सीमन्तोन्नयनसंस्कार:
४. जातकर्मसंस्कार:
५. नामकरणसंस्कार:
६. निष्क्रमणसंस्कार:
७. अन्नप्राशनसंस्कार:
८. चुडाकरणसंस्कार:
९. कर्णवेधसंस्कार:
१०. उपनयनसंस्कार:
११. विद्यारम्भसंस्कार:
१२. केशन्तसंस्कार:
१३. समावर्तनसंस्कार:
१४. विवाहसंस्कार:

१५. विवाहाग्निपरिग्रहसंस्कार:
१६. अन्त्येष्टिसंस्कार:

षोडशसु संस्कारेषु अत्र उपनयनसंस्कार: पर्यालोचनीय:। उप-पूर्वकं नी-धातोरुत्तरे ल्युट्-प्रत्ययेन उपनयनमिति शब्दो निष्पद्यते। अर्थात् अध्ययनार्थम् आचार्यस्य उप-समीपं नीयते येन कर्मणा तदुपनयनम्। वैदिकयुगे शिक्षा उपनयनसंस्कारात् प्रारब्धा अभूत्। छान्दोग्योपनिषदि वर्तते श्वेतकेतु: विद्याग्रहणस्योपयुक्तो बभूव किन्तु तस्य उपनयनकाल: अतिवाहितोऽभूत्। पित्रा आरुणिना स गुरो: समीपं ब्रह्मचर्यपालनार्थमादिष्ट:। यत: पित्रा ज्ञायते ब्रह्मचर्यपालनात् प्राक् गुरुणा तस्योपनयनं सम्पादनीयम्—

''श्वेतकेतुर्हारुणेय आस, तं ह पितोवाच श्वेतकेतो, वस ब्रह्मचर्य्यं।
न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति।।''[३]

उपनयनसंस्कारे आचार्येण ब्रह्मचारिणे विविधानुष्ठानमाध्यमेन नवजीवने प्रवेशस्य दीक्षा प्रदीयते। उपनयनसंस्कारात् परं वालको द्विजो भवति। प्रथमं शिशु: मातृजठरात् जायते तत: उपनयनसंस्कारेण शिशु: पुनर्जायते। इत्थं शिशु: द्विर्जायते। एतस्मात् हेतो: वालको द्विजो भवति —

''मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जीबन्धनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजा: स्मृता:।।''[४]

शास्त्रेषु शूद्रवर्णं विहाय सर्ववर्णानामुपनयनसंस्कारस्य विधि: प्रवर्तते। ब्राह्मणादीनां कृते स्मृत्यादिग्रन्थे उपनयनसंस्कारस्य निर्दिष्ट: काल: उल्लिख्यते। ब्राह्मणजातकाय गर्भात् अष्टमवर्षे, क्षत्रियजातकाय एकादशवर्षे, वैश्यजातकाय द्वादशवर्षे उपनयनसंस्कार: विधीयते —

''गर्भाष्टमेषु ब्राह्मणं, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यम्।।''[५]

मनुसंहितायामपि उपनयनसंस्कारार्थं पूर्वोल्लिखिता: काला: निर्दिश्यन्ते —

''गर्भाष्टमे कुर्वीत ब्राह्मणस्योपनायनं।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश:।।''[६]

अपि च ब्राह्मणवालकेषु य: तीक्ष्णबुद्धिसम्पन्न: तस्य उपनयनसंस्कार: गर्भात् पञ्चमवर्षे भवेत्, वलप्रार्थिन: क्षत्रियवालकस्य षष्ठवर्षे, कृषिकार्ये अभिमतप्रकाशकारिण: वैश्यस्य अष्टमवर्षे उपनयनं करणीयम् —

''ब्रह्मचर्यसकामस्य कार्यं विप्रस्य पञ्चमे।
वज्ञोवलार्थिन: षष्ठे वैश्यस्येहार्थिनोऽष्टमे।।''[७]

उपयुक्ते काले यदि वालकानामुपनयनसंस्कारो न भवेत् तर्हि वर्णानुक्रमेण उपनयनसंस्कारस्य अन्तिमकाला: यथाक्रमं प्रदर्शन्ते- षोडशवर्ष:, द्वाविंशवर्ष:, चतुर्विंशवर्षश्च —

''आषोडशाद्ब्राह्मणस्यानात्यस्य आद्वाविंशात्क्षत्रियस्याऽऽचतुर्विंशद्वैश्यस्य यथा व्रतेषु समर्थ: स्यात्।''[८]

कास्मिंश्चित् कारणे यदि वालकस्य उपनयनसंस्कारस्य अन्तिमकाल: अतिक्रम्यते तर्हि वालक: व्रात्यसंज्ञया अभिधीयते। व्रात्यवालक: समाजे निन्दनीय:—

''अत: उर्द्धं त्रयोऽप्येते यथाकालमसंस्कृता:।
सावित्री पतिता व्रात्याभवन्त्यार्यविगर्हिता:।।''[९]

कस्मिन्नपि शुभकार्ये व्रात्यवालकस्य अधिकार: नास्ति। उपनयनसंस्कारे यज्ञोपवीतधारणस्य आवश्यकता प्राचीनकालात् प्रवर्तते। गायत्रीमन्त्रेणाभिमन्त्रितं यज्ञसूत्रं हि ब्रह्मसूत्रम्। अत: सम्मानेन सावधानेन च सर्वै: यज्ञसूत्रं रक्षितव्यम्। संस्कारत: मृत्युपर्यन्तं देहात् यज्ञोपवीत: न विच्छेदनीय:, यत: यज्ञोपवीतं विना सर्वकर्म निष्फलं भवेत्। यदि यज्ञोपवीतो दूषितो भवेत् तर्हि पुन: नवीन: यज्ञोपवीत: परिधानीय:। ब्राह्मण-क्षत्रिय-वैश्यवर्णानां यज्ञोपवीता: कार्पाससूत्रेण, शानसूत्रेण, मेषलोमसूत्रेण च निर्मीयन्ते —

''कार्पासमुपीतं स्याद्विप्रस्योर्द्धवृत्तं त्रिवृत्।
नसूत्रमयं राज्ञोवैश्यस्याविकसौत्रिकं।।''[१०]

यज्ञोपवीतस्य त्रीणि रूपाणि सन्ति। वामस्कन्धात् दक्षिणकक्षे लम्बितस्य यज्ञोसूत्रस्य नाम उपवीत:, दक्षिणस्कन्धात् वामकक्षे लम्बितस्य यज्ञोसूत्रस्य नाम प्राचीनावीत:, कण्ठस्थले माल्यवत् लम्बितस्य यज्ञोपवीतस्य नाम निवीत:—

''उद्धृते दक्षिणे पानावुपवीत्युच्यते द्विज:।
सव्ये प्राचीनवीती निवीती कण्ठसज्जने।।''[११]

उपनयनसंस्कारे ब्रह्मचारिभि: मेखला धारणीया। मुंजतृणेन ब्राह्मणस्य मेखला भूयते, क्षत्रियस्य मेखला धनुष: ज्यावत्, वेश्यस्य मेखला शानसूत्रेण संसृज्यते —

''मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शानतान्तवी।।''[१२]

मुञ्जादीनाम् अप्राप्त्यां कुशादिभि: मेखला समुत्पद्यते —

''मुञ्जालाभे तु कर्तव्या: कुशाश्मान्तकवल्वजै:।
त्रिवृता ग्रन्थिनैकेन त्रिभि: पञ्चभिरेव वा।।''[१३]

मेखलया सह ब्राह्मणादीनां दण्डधारणस्य विधानं संवर्तते। ब्राह्मणाय विल्वस्य दण्डो विधीयते, क्षत्रियस्य कृते वटदण्ड: विद्यते, वैश्याय उदुम्बरस्य दण्ड: निर्धार्यते —

''ब्राह्मणोवैल्वपालाशौ क्षत्रियोवाटखदिरौ।
पैलवोडुम्बरौ वैश्यदण्डानर्हन्ति धर्म्मत:।।''[१४]

धर्मसूत्रादिग्रन्थे उपनयनसंस्कारार्थं विशिष्टऋतुनामुल्लेख: प्राप्यते। ब्राह्मणवर्णस्य कृते वसन्तऋतु:, क्षत्रियवर्णस्य कृते ग्रीष्मऋतु:, वैश्यवर्णार्थञ्च शरदृतु: स्थिरीक्रियन्ते —

''वसन्ते ब्राह्मणमुपनीत, ग्रीष्मे राजन्यं, शरदि वैश्यम्।''[१५]

ऋतुवत् मन्त्रोऽपि भिन्नं भवति। ब्राह्मणादिवर्णानां कृते मन्त्रा: यथाक्रमं- गायत्रीमन्त्र:, त्रिष्टुब्मन्त्र:, जगतीमन्त्रश्च —

''गायत्रीत्रिष्टुब्जगतीभिर्यथाक्रमम्।''[१६]

वैदिककाले कन्यानामपि उपनयनसंस्कारस्य प्रथा प्रचलिता। अथर्ववेदे उक्तम् —

''ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।''[१७]

ब्रह्मचर्यमधिकृत्य कन्याः युवत्यः भवन्त्यः यौवनकाले ताः विद्वानपतिं आपन्। एतस्मात् बोध्यते तत्काले कन्यानाम् उपनयनसंस्कारस्य विधिः प्रवर्तितः। यतोहि ब्रह्मचर्यावलम्बनस्य पूर्वशर्तो हि उपनयनसंस्कारः। नार्यः किल यज्ञेपवीतं दधुः—

''प्रावृतां यज्ञोपवीतिनीमभ्युदानयञ्जपेत् सोमोऽददद्गन्धर्वायेति।''[१८]

कन्याभिः यज्ञोपवीतं धारयित्वा ब्रह्मचर्यव्रतं पालितम्। एतदर्थं तत्काले गायत्रीमन्त्रपाठाग्न्याधानप्रभृतिषु नारीणामवाधविचरणं परिदृष्यम्। ब्रह्मचर्यव्रतपालनादनन्तरं विवाहं कृत्वा काभिः गार्हस्थ्यधर्मः पालितः काभिः आजीवनात् ब्रह्मचर्यव्रतं पालितम्। वैदिकयुगे नार्यः पुरुषवत् पूर्णमर्यादायामधिष्ठिताः अभूवन्।
किन्तु वैदिकोत्तरकाले नारीणामुपनयनसंस्कारः विलुप्तप्रायः। तेषां मर्यादायाः क्रमह्रसमानता संलक्ष्यते। स्मृतिकारेण परिगण्यते यत् विवाहसंस्कारो हि कन्यानामुपनयनसंस्कारः, पतिसेवा कन्यानां गुरूगृहवासः, गृहकर्म अग्निहोत्रादिस्वरूपम् —

''वैवाहिकोविधिः स्त्रीणां संस्कारोवैदिकः स्मृतः।
पतिसेवा गुरौ वासोगृहार्थोऽग्निपरिष्क्रिया।।''[१९]

तैत्तिरीयसंहितायां समुच्यते- जन्मतः मानवानां त्रीणि ऋणानि विद्यन्ते। यथा —
१. ऋषि-ऋणम्
२. देव-ऋणम्
३. पितृ-ऋणम्

यज्ञोपवीतसंस्कारादनन्तरं ब्रह्मचर्यव्रतपालनेन मानवाः ऋषिऋणात्, यजनपूजनादिभिः देवऋणात्, गार्हस्थ्यधर्ममवलम्ब्य सन्तानोत्पत्या पितृऋणात् प्रमुञ्चन्ते। यदि मानवानां उपनयनसंस्कारो न भवेत् तर्हि त्रिभ्यः कर्मणः ते वञ्चिताः भवन्ति। अतः उपनयनसंस्कारः मानवार्थमतीव महत्वपूर्णः, उपनयनसंस्कारो यज्ञोपवीतसंस्कारो वा ब्रह्मचर्यव्रतस्य तथा विद्याध्यायनस्य प्रवेशद्वारः।
उपनयनसंस्कारात् परं विद्यर्थिभिः अध्ययनेन सह गुरुगृहे सर्वप्रकारस्य व्रतपालनं, प्रतिदिनं प्रातः सायं सन्ध्यावन्दना, भिक्षचरणप्रभृतयः संसाध्यन्ते। एतानि व्यतिरिच्य ब्रह्मचारिभिः ब्रह्मचर्यः, शौचाचारः, सदाचारः, भक्ष्याभक्ष्यादिनियमाः तथाच यमनियमादिविषयाः यथाविधि अनुसरणीयाः। शिक्षासमापनान्ते गुरोः अन्तिमदीक्षां नीत्वा ब्रह्मचारिणा स्वगृहम् आगम्य गार्हस्थ्यधर्मे प्रविश्यते।
उपनयनसंस्कारार्थमृतुः, मासः, लग्नः, तिथिः, नक्षत्रप्रभृतिविषया विचार्याः। उपनयनसंस्कारानुष्ठाने मौञ्जादिमेखला, यज्ञोपवीतः, मृगचर्म, भिक्षापात्रं, पलाशादिदण्ड, कोपीनप्रभृतयः द्रव्यविशेषाः प्रयोजनीयाः। वैदिकक्रियाकर्म अनुसृत्य उपयुक्तसमये प्रयोजनीयद्रव्यसहायेन उपनयनं कुर्यात्।
अधुना उपनयनसंस्कारस्य स्वरूपं परिवर्तते। प्रायः सर्वेण मन्यते यत् उपवीतधारणेन उपनयनसंस्कारः सम्पद्यते। अपि च उपवीतधारणस्य प्रथा केवलं ब्राह्मणेषु सीमाबद्धा अस्ति। परन्तु शिक्षायाः अधिकारः सर्वेषां वर्तते। उपनयनसंस्कारेण सह शिक्षायाः कोऽपि सम्बन्धो नास्ति। क्रमशः उपनयनसंस्कारेण सह सम्बन्धो वैदिगाचारानुष्ठानो ह्रस्वीभूयते। इदानीं अनेके वैदिगानुष्ठानं परित्यज्य हरिद्वारादितीर्थस्थानं गत्वा गंगास्नानं कृत्वा आपणात् यज्ञोपवीतं क्रीत्वा स्कन्धे परिधानं कुर्वन्ति। इत्थं समाजे उपनयनसंस्कारः सम्पद्यते।

**सन्दर्भाः**

१. ब्रह्मसूत्रभाष्यम् — ११४
२. व्यासस्मृतिः- १.१३-१५
३. श्न्दोग्योपनिषद् — ६.१.१
४. याज्ञवल्क्यस्मृतिः- १.३९
५. आपस्तम्बधर्मसूत्रम्-१.१.९
६. मनुसंहिता- २.३६
७. मनुसंहिता- २.३७
८. आपस्तम्बधर्मसूत्रम् — १.१.२७
९. मनुसंहिता- २.३९
१०. मनुसंहिता- २.४४
११. मनुसंहिता — २.६३
१२. मनुसंहिता- २.४२
१३. मनुसंहिता — २.४३
१४. मनुसंहिता — २.४५
१५. आपस्तम्बधर्मसूत्रम् — १.१.१९
१६. बौधायनधर्मसूत्रम् — १.२.१२
१७. अथर्ववेदः - ११.५.१८
१८. गोभिलगृह्यसूत्रम् — २.१.१९
१९. मनुसंहिता- २.६७

**सन्दर्भग्रन्थाः**

१. अथर्ववेदसंहिता (द्वितीयखण्डः), सायणभाष्यसहिता, के. एल. जोशिः, दिल्ली, परिमलपव्लिकेशन्, २०१५।
२. आपस्तम्बधर्मसूत्रम्, उज्ज्वलाटीकासहितम्, चिन्तास्वामिशास्त्री रमानाथशास्त्री च, वनारस्, चौखम्बा-संस्कृत-सीरिज-आफिस्, १९३२।
३. बौधायनधर्मसूत्रम्, विवरणटीकासहितम्, चिन्तामनिशास्त्री, वनारस्, चौखम्बा-संस्कृत-सीरिज-आआसि्, १९३४।
४. ब्रह्मसूत्रम् (प्रथमभागः), शङ्करभाष्य-रत्नप्रभाभाषानुवादसहितम्, श्रीभोलेबाबा, वाराणसी, भारतीय-विद्या-प्रकाशन्, १९९८।
५. गोभीलगृह्यसूत्रम्, उदयनारायणः, मुजफ्फरपुरः, मधुरापुरस्थ-शास्त्रप्रकाश-कार्यालयः, १९०६।
६. छान्दोग्योपनिषद् (द्वितीयभागः), दुर्गाचरणः, कलिकाता, देव-साहित्य-कुटीर-प्राइभेट-लिमिटेड्, २०१४।
७. मनुसंहिता, कुल्लूकभट्टकृतटीकासहिता, मानवेन्दुवन्द्योपाध्यायः, कलिकाता, संस्कृत-पुस्तक-भाण्डारः, २०१६।
८. याज्ञवल्क्यस्मृतिः (प्रथमखण्डः), मिताक्षराटीकासहिता, उमेशचन्द्रपाण्डेयः, वाराणसी, चौखम्बा-संस्कृत-संस्थान्, १९८३।